# Rajna Kritam Shiva Stotram

# રાજ્ઞા કૃતં શિવસ્તોત્રમ્

## Document Information

Text title : Rajna Kritam Shiva Stotram

File name : rAjnAkRRitaMshivastotram.itx

Category : shiva, tAmraparNImAhAtmya, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : tAmraparNImAhAtmya | adhyAya 51/58-68||

Latest update : December 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 13, 2025

*sanskritdocuments.org*

# રાજ્ઞા કૃતં શિવસ્તોત્રમ્

રાજોવાચ ।

ૐ તદ્વાચ્યં દ્યોતમાનં મહાન્તં જ્યોતિર્નિત્યં સત્સમાધેયરૂપમ્ ।
માન્યં મોહાપાયહેતું પ્રપદ્યે પ્રાયઃ શ્રેયઃ પ્રાપ્તુમૈશં મહિમ્ના ॥ ૫૮॥

યાતાયાતશ્રાન્તિસન્તારહેતોઃ હાતું માયાજાલિકાબન્ધનાનિ ।
સન્ધાતું વૈ જીવલેખાં મહિમ્ના સાક્ષાદીશં સંશ્રયે તત્ત્વરૂપમ્ ॥ ૫૯॥

કર્માકારં તત્ફલાકારરૂપં કર્તૃત્વે ચ વ્યક્તિમભ્યેષિ વાસમ્ ।
ઇજ્યાકારં દેવતાકારમન્તઃ શૈવં ભાવં યાતુમીહે મહાન્તમ્ ॥ ૬૦॥

તીર્થાકારો યઃ પરિત્રાતુમેતન્મન્ત્રાર્ણાત્મા નૈગમાન્તર્વિલાસી ।
સાક્ષી દાતા કર્મણાસૌ ફલાનાં દેવો ભૂયાદગ્રતો નઃ પુરાણઃ ॥ ૬૧॥

યન્નામર્ણાન્ વાચિ કુર્વન્ પ્રમાદાદભ્યર્થાદ્વા પાપતો મુક્તિમેતિ ।
તં ત્વામન્તશ્ચન્દ્રચૂડં પ્રપદ્યે નીલગ્રીવ ત્રાહિ નઃ કર્મબન્ધાત્ ॥ ૬૨॥

અન્તઃકરણા નેડમૂકાક(?)નાથાઃ યત્તે કિઞ્ચિદ્વૃત્તમુલ્લાસ્ય શમ્ભુમ્ ।
પાપાન્મુક્તા યાન્તિ તજ્જ્યોતિરૈશં પાશાપાયં નૌમિ નાથં પશૂનામ્ ॥ ૬૩॥

હેતુસ્સાક્ષી તન્નિયન્તાપહન્તા જન્તોરન્તર્જીવરૂપો ચ ભૂયઃ ।
યેઽસ્પૃશ્યાત્મા કથ્યતે બ્રહ્મવિદ્ભિઃ સોઽયં શમ્ભુઃ પાતુ નઃ કર્મબન્ધાત્ ॥ ૬૪॥

વિશ્વાત્મા યો વિશ્વરૂપો નિયન્તા કાલે કાલે યોજયિત્વા સ્વવૃત્યા ।
કાલક્ષેપં કલ્પયત્યેષ નિત્યં તસ્મૈ ધામ્ને કલ્પયે ચિત્તમદ્ધા ॥ ૬૫॥

યુક્ત્યા મન્ત્રૈર્વેદતત્ત્વાર્થદૃષ્ટૈઃ બુદ્ધ્યા શુદ્ધ્યા વાગ્વિલાસાદ્ગુરૂણામ્ ।
અન્વેષન્તે યોગિનો યત્પદાબ્જં તસ્મિન્નાશા ભૂયસી મેઽસ્તુ નિત્યમ્ ॥ ૬૬॥

નિત્યં શુદ્ધં નિર્વિકલ્પં પુરાણં સત્યં સૂક્ષ્મં સર્વસઙ્કલ્પહીનમ્ ।
શ્રદ્ધામાત્રં શમ્ભુમાદ્યં વિનોદાત્સાલઙ્કારં કારયેન્નીલકણ્ઠમ્ ॥ ૬૭॥

દેવ પ્રસીદ પરમેશ્વર ચન્દ્રમૌલે લીલાવિશેષપરિકલ્પિતપઞ્ચકૃત્ય ।

પશ્યન્ ત્રિકાલભવભૂતપતે દયાલો માં પાહિ મોહકુહરાદ્ગહનાત્પ્રપન્નમ્ ॥ ૬૮॥

ઇતિ તામ્રપર્ણીમાહાત્મ્યે ૫૧-અધ્યાયાન્તર્ગતં
રાજ્ઞા કૃતં શિવસ્તોત્રં સમ્પૂર્ણમ્ ।

તામ્રપર્ણીમાહાત્મ્ય । અધ્યાય ૫૧/૫૮-૬૮॥

tAmraparNImAhAtmya . adhyAya 51/58-68..

Proofread by PSA Easwaran

---

*Rajna Kritam Shiva Stotram*

pdf was typeset on December 13, 2025

Please send corrections to *sanskrit@cheerful.com*